"अमन्तिका तु कार्थ्यं स्त्रीणामावृदशेषतः" ॥)

आवृतः, त्रि, (आङ् + वृ + क्तः ।) कृतावरणः । तत्पर्य्यायः । वेष्टितम् २ वलयितम् ३ संवीतम् ४ रुद्धम् ५ । इत्यमरः ॥ (आच्छादितं, प्रावृतं, आकीर्णं । वर्णभेदः, स च ब्राह्मणादुग्रजातीयायां जातः ।)

आवृत्तः, त्रि, (आङ् + वृत् + क्तः ।) कृतावरणः । आवृतः । इत्यमरटीका ॥ (अभ्यस्तः, क्रमवैपरीत्येन स्थापितः, प्रतिनिवृत्तः, पलायितः, उद्वर्त्तितः, परिवर्त्तितः । यथा उत्तरचरिते,
"स कृतस्त एव सन्दर्भोऽस्माकमावृत्तः" ।)

आवेगः, पुं, (आङ् + विज् + घञ् ।) त्वरा । इति हेमचन्द्रः ॥ (यथा दशरूपके,—
"आवेगः सम्भ्रमोऽस्मिन्नभिसरजनिते शस्त्रनागादियोगो वातात् पांशूपदिग्धस्त्वरितपदगतिर्वर्षजे पिण्डिताङ्गः" । यथा अमरुशतके ८, ३ ।
"आवेगादवधीरितः प्रियतमस्तूर्णीं स्थितस्तत्क्षणात्" ।)

आवेगी, स्त्री, (आङ् + विज् + घञ् + ङीप् ।) वृद्धदारकवृक्षः । इत्यमरः राजनिर्घण्टश्च ।
(अस्या गुणादयो वृद्धदारकशब्दे द्रष्टव्याः ॥)

आवेदनं, क्ली, (आङ् + विद् + ल्युट् ।) निवेदनं । (विज्ञापनम् ।)

आवेशः, पुं, (आङ् + विश् + घञ् ।) अहङ्कारविशेषः । तत्पर्य्यायः । संरम्भः २ आटोपः ३ । अपस्माररोगः । इति हेमचन्द्रः ॥ भूतादिना रोगः । तत्पर्य्यायः । भूतसञ्चारः २ भूतक्रान्तिः ३ ग्रहामयः ४ । इति राजनिर्घण्टः ॥ आसक्तिः । अभिनिवेशः ॥ (यथा रघुवंशे, ५।१९ ।
"तस्मै सभयावेशविवर्ज्जिताय" ।)

आवेशनं, क्ली, (आविश्यतेऽस्मिन् । आङ् + विश् + ल्युट् ।) शिल्पशाला । इत्यमरः ॥ (मनुः, ९।२६५ ।
"जीर्णोद्यानान्यरण्यानि कारुकावेशनानि च" ।
(भावे ल्युट् ।) भूतावेशः । (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः" ।)
प्रवेशः । इति मेदिनी ॥ कोपः । इति धरणी ॥ परिवेशः । इति हेमचन्द्रः ॥

आवेशिकः, त्रि, (आवेशं संरम्भं प्राप्तः । आवेश + ठञ् ।) आगन्तुः । अतिथिः । इत्यमरः ॥ स्वीयं । असाधारणं । तत्पर्य्यायः । अन्यासाधारणं २ प्रातिस्विकं ३ । इति त्रिकाण्डशेषः ॥

आवेष्टकः, पुं, (आङ् + वेष्ट + ण्वुल् ।) प्राचीरादिः । इति हलायुधः ॥ पाँचिल वेड़ा इत्यादि भाषा ॥

आवोधनं, क्ली, (आङ् + वुध् + ल्युट् ।) ज्ञानम् । बुद्धिः ॥

आशंसा, स्त्री, (आङ् + शन्स + अङ् + टाप् ।) इच्छा । आकाङ्क्षा । इति हेमचन्द्रः ॥
(रघुवंशे, १२।४४ ।
"निदधे विजयाशंसां चापे सीताञ्च लक्ष्मणे" ।)

आशंसिता, [ऋ] त्रि, (आङ् + शन्स + तृच् ।) आशंसाकर्त्ता ॥ आकाङ्क्षाशीलः । इत्यमरः ॥

आशंसुः, त्रि, (आङ् + शन्स + उ ।) आशंसिता । इच्छुः ॥ इत्यमरः ॥

आशक्तः, त्रि, (आङ् + शक् + क्तः ।) सम्यक्शक्तिविशिष्टः ॥

आशङ्का, स्त्री, (आङ् + शकि + अ + टाप् ।) भयं । त्रासः । इति हेमचन्द्रः ॥ (संशयः, वितर्कः ।) शाकुन्तले, प्रथमाङ्के ।
"नष्टाशङ्का हरिणशिशवो मन्दमन्दं चरन्ति" ।
कथासरित्सागरे, १४ तरङ्गे ।
"तत् श्रुत्वा विगताशङ्कस्तामकारणदूषिताम्" ।)

आशनः, पुं, (अशन + स्वार्थे अण् ।) अशनवृक्षः । इति भरतः द्विरूपकोषश्च ॥

आशयः, पुं, (आङ् + शीङ् + अच् ।) अभिप्रायः । पनसवृक्षः । आधारः । इति विश्वमेदिन्यौ ॥ विभवः । किम्पचानः । चेतः । अजीर्णं । कोष्ठागारं । इत्यजयपालः । धर्म्माधर्म्मौ । अदृष्टं । इति कुसुमाञ्जलिः ॥ (अभिप्रायार्थे यथा, कथासरित्सागरे, १२ तरङ्गे ।
"तत्रालोक्याशयं बुद्धा तस्य सोऽपि वसन्तकः" ।
चित्तार्थे यथा, भगवद्गीतायां, १०।२० ।
"अहमात्मा गुडाकेश सर्व्वभूताशये स्थितः" ।
"आशयाः सप्त" । "आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम" इति । सुश्रुतः ॥)

आशयाशः, पुं, (आशेरतेऽत्रेत्याशयः । रच् । आधारः । तमश्नाति । कर्म्मण्यण् ।) आश्रयाशः । अग्निः । इत्यमरटीकायां स्वामी ॥

आशरः, पुं, (आ शृणाति शॄ हिंसायां + पचाद्यच् ।) अग्निः । राक्षसः । इति मेदिनी ॥

आशा, स्त्री, (आ समन्तात् अश्नुते व्याप्नोतीति । आङ् + अशू + पचाद्यच् + टाप् ।) दीर्घाकाङ्क्षा । आयता तृष्णा । (यथा, शान्तिशतके, ४।२६ ।
"आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला" ।
दिक् । इत्यमरः ।
वासवाशामुखे भाति इन्दुश्चन्दनविन्दुवत्" ॥
इति साहित्यदर्पणे १० परिच्छेदे । स्वनामख्याता दक्षप्रजापतिकन्या । यथा, हरिवंशे,—
"श्रीर्ह्रीर्धृतिस्तथा कीर्त्तिराशा मेधा च सुव्रता" ।)

आशाढः, पुं, आषाढमासः । व्रतिनां पलाशदण्डः । इत्यमरटीका द्विरूपकोषश्च ॥

आशाढा, स्त्री, पूर्व्वाषाढानक्षत्रं । उत्तराषाढा च ॥

आशापुरसम्भवः, पुं, (आशापुरात् सम्भवो यस्य ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥

आशाबन्धः, पुं, (आशाया बन्धः । षष्ठीतत् ।) समाश्वासः । (मेघदूते,—
"आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां ।
सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि" ॥)
प्रत्याशा । मर्कटजालकं । माकड़सार जाल इति भाषा । इति मेदिनी ॥

आशितं, त्रि, (आङ् + अश् + क्तः ।) अशितं । भुक्तं इति जटाधरः ॥

आशितङ्गवीनं, त्रि, (आशिता भोजिता गावो यत्र अषड़क्षाशितङ्ग्वलमिति खः । निपातनात् पूर्व्वस्य मुम् ।) अशिताङ्गवीनं । गावो यत्राशिताः पुरा । इत्यमरः ॥ (यथा भट्टिकाव्ये ४र्थ सर्गे ।
"हित्वाशीतङ्गवीनानि फलैर्यत्राशितम्भवम्" ।)
पूर्व्वे ये स्थाने गरु चरियाछे इति भाषा ।

आशितम्भवं, क्ली, (आशित + भू + खच् + मुमागमः ।) अन्नादि । तृप्तौ पुं । इति मेदिनी ॥ (यावता अन्नेन अतिथ्यादिः भोजितः तृप्तोभवति तावत् अन्नादिकम् । यथा, भट्टिकाव्ये ४र्थ सर्गे,—
"हित्वाशिताङ्गवीनानि फलैर्यत्राशितम्भवम्" ।)

आशिता [ऋ] त्रि, (आ अश्नातीति । आ + अश् + तृच् ।) बहुभोजनशीलः । अतिशयभोक्ता । इति हेमचन्द्रः ॥

आशिरः, पुं, (आ + अश + किरच् ।) राक्षसः । अग्निः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (सूर्य्यः ।)

आशीः, [स्] स्त्री, (आङ् + शास् + क्विप् + उपधाया इत्वम्) आशीर्व्वादः । सर्पदन्तः । इत्यमरः ॥ वृद्धिनामौषधिः । इति राजनिर्घण्टः ॥ (हितप्रार्थनं, अभीष्टवृद्धिप्रार्थनं । यदुक्तं,—
"वात्सल्यात् यत्र मान्येन कनिष्ठस्याभिधीयते ।
इष्टावधारकं वाक्यमाशीः सा परिकीर्त्तिता" ॥
यथा, कुमारे ७।४७ ।
"तस्मै जयाशीः ससृजे पुरस्तात्" ।)

आशी, स्त्री, (आङ् + अश् + अच् + ङीप् ।) हिताशंसनं । अहिदन्तः । सर्पविषं । इति शब्दरत्नावली ॥ [इति विषविद्या ॥
"आशी तालुगता दंष्ट्रा तया दष्टो न जीवति" ।

आशीर्व्वादः, पुं, (आशिषो वादः षष्ठीतत् ।) आशीर्वचनं । मङ्गलप्रार्थना ॥ (यथा, मनुः । २।३३ ।
"मङ्गल्यं दीर्घवर्णान्तमाशीर्व्वादाभिधानवत्" ।)

आशीविषः, पुं, (आशिषि दंष्ट्रायां विषमस्य सः पृषोदरादित्वात् साधुः ।) सर्पः । इत्यमरः ॥
रघुवंशे,—१२।५७ ।
"गरुत्मदाशीविषभीमदर्शनैः" ।

आशुः, पुं, क्ली, (अशू + उण् ।) प्रावृट्कालसमुद्भवधान्यं । आउश इति भाषा । तत्पर्य्यायः । व्रीहिः २ पाटलः ३ । अस्य गुणाः । मधुरत्वम् । पाके अम्लत्वम् । पित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

आशु, क्ली, (अश्नुते इति । अशूङ् व्याप्तौ उण् ।) शीघ्रम् । द्रुतम् । (यथा शाकुन्तले १ अङ्के ।
("तदाशु कृतसन्धानं प्रतिसंहर सायकम्" ।)
सत्वरगामि चेत् त्रि । इत्यमरः ॥

आशुगः, पुं, (आशु शीघ्रं गच्छतीति । आशु + गम् + ड ।) वायुः । बाणः । (रघुवंशे, १२।९१ ।
"रावणस्यापि रामास्तो भित्वा हृदयमाशुगः" ।)
शीघ्रगामिनि, त्रि । इत्यमरः ॥ मनुः ४।६८ ।
("विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः" ।)

आशुपत्री, स्त्री, शल्लकीलता । इति रत्नमाला ॥

आशुव्रीहिः, पुं, (आशुः व्रीहिः ।) आशुधान्यं । इत्यमरटीकायां भरतमुकुटौ ॥